जलहर ! संहर एह कोवं मइ आश्रत्तओ
अविरल-धारासाराक्कंत-दिसामुहओ ।
अए ! मइ पुहविं भमंते जइ पिअं पेक्खिहिमि
तआ जं जं करोहिसि तं तं सहीहिमि ॥ (ब) (२५)

[ चर्चरिकया विचिन्त्य ]। वृथा खलु मया मनसः सन्ताप-वृत्तिरपेक्ष्यते । यदा मुनयोऽप्येवं व्याहरन्ति—'राजा कालस्य कारणम्' इति, तत् किमहमेनं जलधरसमयं न प्रत्यादिशामि ? (२६) [ विहस्य उत्थाय, "यदा मुनयोऽप्येवं व्याहरन्ति" इति पुनः पठित्वा ]। भवतु प्रत्यादिशामि ।

[ अनन्तरे चर्चरी ]।—

गंधुम्माइअ महुअर-गीएहिं
वज्जंतेहिं परहुअतूरेहिं ।
पसरिअ-पवणुव्वेल्लिअ पल्लव-णिअरु
सुललिअ-विविहपआरेहिं णच्चइ कप्पतरु (भ) (२७)

---

(ब) जलधर ! संहर एव कोपं मया आज्ञप्तकः
अविरलधारासाराक्रान्तदिङ्मुखः ।
अयि ! अहं पृथिवीं भ्रमन् यदि प्रियां प्रेक्षिष्ये
तदा यद्यत् करिष्यसि तत्तत् सहिष्ये ॥

---

पठति प्रेमभरात्रटी यदि । प्रतिमण्ठक-रासकेन वा द्रुतमध्या प्रथमा हि चर्चरी ॥" इति । प्रतिमण्ठकः तालविशेषः । रासकेन इति ।—"लघ्वादिताखो लोकेऽसौ रास इत्यभिधीयते" इति ।

(२५) जलधरेति ।—कोपम् अविरलधारावर्षणरूपं प्रबलवेगमित्यर्थः । मया आज्ञप्तः मदादिष्टः ममादेशेनेत्यर्थः । यदा प्रियां प्राप्स्यामि तदा तव दुःसहं कार्य्यं सहिष्ये, अन्यथा न इति भावः ।

(२६) वृथा खलु इति ।—अकारणमेव मे मनसः सन्तापो वर्त्तते, यतः कालानां राजाधीनत्वात् ; अयमहं जलधरसमयस्य निवारणे समर्थ इत्यर्थः । न प्रत्यादिशामि निवर्त्तयामीति भावः ।

भवतु, आदास्ये तावत् । [ग्रहणं नाटयति ] ।—

पणइणि-वह्वासाद्दिअओ
वाह्वाउल-णिअ-णअणओ ।
गअवइ गहणे दुक्खिअओ
परिब्भमइ किलामिअ-वअणओ ॥ (ट) (१११)

[ द्विपदिकया उपसृत्य गृहीत्वा आत्मगतम् ] ।—

मन्दारपुष्पैरधिवासितायां
यस्याः शिखायामयमर्पणीयः ।
सैव प्रिया सम्प्रति दुर्लभा मे
मैवेनमस्रूपहतं करोमि ॥ (११२)

[ इति उत्सृजति ] ।

[ नेपथ्ये ] । वत्स ! गृह्यतां वत्स ! गृह्यताम् ।—

सङ्गमनीयो मणिरिह शैलसुता-चरण-रागयोनिरयम् ।
आवहति धार्य्यमाणः सङ्गममाशु प्रियजनेन ॥ (११३)

---

(ट) प्रणयिनी-वह्न्याशार्दितको वाष्पाकुलनिजनयनकः ।
गजपतिर्गहने दुःखितकः परिभ्रमति क्लान्त-वदनकः ॥

---

आलम्बितकरः सन् व्यवसितः इव कृतोद्योग इव, ग्रहणाय कृतप्रयत्न इव इत्यर्थः । मणेस्तस्य सौरकरराशिवेष्टितत्वात् तद्ग्रहणाय सूर्य्यः प्रसारितकर इवेत्युत्प्रेक्षा । शिखरिणी वृत्तम् ।

(१११) प्रणयिनीवह्न्येत्यादि ।—प्रणयिन्यां प्रियतमायां वह्ना लग्ना या आशा तया अर्दितः पीडितः । क्लान्तवदनकः मलिनमुख इत्यर्थः ।

(११२) मन्दारेति ।—अधिवासितायां सुगन्धीकृतायाम् । अस्रूपहतं नेत्रोदकसम्पर्केण कलुषितम् । मे इत्यत्र सम्बन्धविवक्षायां षष्ठी । इन्द्रवज्रा वृत्तम् ।

(११३) सङ्गमनीय इति ।—इह, इह इति शेषः, अयं शैलसुताचरणराग-योनिः गौरीपादपद्मरागसम्भूतः सङ्गमनीयसदाख्यः मणिः धार्य्यमाणः अङ्गेषु परिधीयमानश्चेत् आशु शीघ्रं प्रियजनेन सङ्गमं मेलनम् आवहति जनयति । आर्य्या वृत्तम् ।

